शोध मंथन, Impact Factor 6.726 (SJIF), UGC No. 40908 ISSN: (P): 0976-5255 (e): 2454-339X

Available at: *http://shodhmanthan.anubooks.com/* https://doi.org/10.31995/shodhmanthan

# मनुस्मृतौ सुशासन-तन्त्रस्य स्वरूपम्

**डॉ0 गौरव शर्मा**
*1522, नदी मौहल्ला, प्रेम मन्दिर गली,*
*अम्बाला शहर, हरियाणा*
*Email: gauravmaitray@gmail.com*

मनुः राज्यसप्तांगेषु स्वाभाविकैकता अवलोकितवान्। सर्वाणि अंगानि लक्ष्यप्राप्त्यर्थं मिथः कार्यशीलाः भवन्तु। सर्वाणि अंगानि महत्वपूर्णानि सन्ति, कमप्यंगं न्यूनं नास्ति, एकस्य महिमा स्वास्मिन् स्थानेऽस्ति, अपरस्य च अन्यस्थाने।

**सप्तानां प्रकृतीनां तु राज्यस्यासां यथाक्रमम्।**
**पूर्वं पूर्वं गुरुतरं जानीयाद्व्यसनं महत्।।**
**सप्तांगस्येह राज्यस्य विष्टब्धस्य त्रिदण्डवत्।**
**अन्योन्यगुणवैशेष्यान्न किंचिदतिरिच्यते।।**
**तेषु तेषु तु कृत्येषु यत्तदंगं विशिष्यते।**
**येन यत्साध्यते कार्यं तत्तस्मिन्श्रेष्ठमुच्यते।।**[१]

**(क) स्वामी, राजा**-'राजन्' शब्दः 'राज्' धातुना निष्पन्नो भवति, यस्यार्थोऽस्ति 'दीपनम्', किन्तु महाभारते शान्तिपर्वणि राजानं 'रंज्' धातुना निष्पन्नः कथ्यते, यस्यार्थोऽस्ति 'प्रमोदः' अर्थात् सैव नृपोऽस्ति यो प्रजां आह्लादयति।[२] अत्र राज्ञः कृते क्षत्रिय शब्दस्यापि प्रयोगः प्राप्यते, क्षत्रियशब्दः 'क्षत' तथा 'त्रै' धातुना निष्पद्यते, यस्यार्थोऽस्ति नाश-व्रणात् वा रक्षेत्।[३]

प्राचीनग्रन्थेषु स्वामी वा शासकशब्दविषये विशेषमहत्वं प्रदीयते स्म। राज्ञः अभावे राज्यस्य या दुर्दशा भवति सा अवर्णनीया अस्ति। मनुः लिखति यत् यदा सर्वे भयाकुला भवन्ति इतस्ततः पलायन्ति, विश्वस्मिन् तेषां कोऽपि दुःखनिवारको न भवति तदा विधातुः अस्य विश्वस्य रक्षार्थं शासकस्य प्रणयनं कृतवान्।

**अराजके हि लोकेऽस्मिन्सर्वतोविद्रुते भयात्।**
**रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः।।**
**इन्द्रनिलय मार्काणामग्नेश्च वरुणस्य च।**
**चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्त शाश्वतीः।।**[४]

मनुः मात्स्यन्यायेन लिखितं यत् यथा ज्येष्ठमत्स्याः कनिष्ठमत्स्यान् खादयन्ति तथैव श्रेष्ठाः बलवत्तराः असहायजनान् ताडयन्ति।

**यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः।**
**शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः।।**[५]

मनुः दण्डं देवत्वोपाधिना शंसितवान्, दण्डः सर्वेषु राज्यं करोति, सर्वेषां रक्षति, सर्वेषां न्यायं ददाति, बुद्धिमत्तरः दण्डं धर्मं नाम्ना अभिधीयन्ते।

**यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा।**
**प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति।।**[६]
**दण्डः शास्ति प्रजा सर्वा दण्ड एवाभिरक्षति।**
**दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः।।**[७]

राज्येच्छा दण्डशक्तिश्च व्यक्ति-राष्ट्रं च धर्मसीमायां स्थापयति, आज्ञा उल्लंघने दण्डं प्रददाति, तथा सर्वेषां कल्याणं करोति। देवदानवगन्धर्वराक्षसनागादयश्चापि मनुष्यानन्दयोग्याः भवन्ति, यतोहि ते दण्डमाध्यमेन संयमिताः भवन्ति।[८] दण्डप्रभाव-प्रशस्तिविषयेषु च मनुस्मृतेः सप्तमाध्यायस्य १४-३१ श्लोकेषु विस्तृतवर्णनं प्राप्यते। दण्डप्रयोगः सामान्तरैव भवितुमर्हति, न तु अतिकठिनं सारल्यं वा भवेत्, अपितु अपराधानुसारमेव भवितुमर्हति।

राजकीयव्यापारमहिमानं द्योतनार्थं केषुचित् ग्रन्थेषु लिखितमस्ति यत् शासके देवांशाः भवन्ति। मनुः वदति यत्-'ब्रह्मणा इन्द्रमरुतयमसूर्याग्निवरुणचन्द्रकुवेरादीनां प्रमुखांशैः नृपस्य रचना कृता, अतः स राजगुणत्वेन सर्वजीवेषु अग्रे गच्छति।'[९] अतो राजानं देवं मत्वा बालकोऽपि तं सम्मानं करोति, यतोहि स नररूपे देवोऽस्ति।

**सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट्।**
**स कुवेरः स वरुणः स महेन्द्रः प्रभावतः।।**
**बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।**
**महती देवता श्वेषा नररूपेण तिष्ठति ।।**[१०]

उपर्युक्तदेवैस्सह पृथिवीं स्थाप्य तेषां वैशिष्ट्यानां वर्णनं कृत्वा राज्ञः गौरवोल्लेखः क्रियते।

नारदस्मृतौऽपि अतिमनोरमरूपेणाग्नीन्द्रसोमयमकुवेरादिकस्य कार्याणि शासके प्राप्यन्ते।

**राजेति संचरत्येष भूमौ साक्षात्सहस्रदृक्।**
**प्रजानां विगुणोऽप्येवं पूज्य एव प्रजापतिः।।**
**पंच रूपाणि राजानो धारयन्त्यमितौजसः।**
**अग्नेरिन्द्रस्य सोमस्य यमस्य धनदस्य च।।**
**अशुचिर्वचनाद्यस्य शुचिर्भवति मानवः।**
**शुचिश्चैवाशुचिः सम्यक् कथं राजा न दैवतम्।।**[१२]

मनुनाऽपि घोषितं यत् नृपः देवांशात् निर्मीयते-

**सर्वदेवमयो राजा मनुना संप्रकीर्तितः।**
**तस्मात्तमेव सेवेत न व्यलीकेन कर्हिचित्।।**[१३]

मनुः वदति यत् यो नृपः प्रजां पीडयति स स्वात्मजीवनं कुटुम्बं राज्यं च विनाशयति।

**मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया।**
**सो चिराद्भ्रृश्यतेराज्याज्जीविताच्च स बान्धवः।।**
**शरीरकर्षणात्प्राणाः क्षीयन्ते प्राणिनां यथा।**
**तथा रज्ञामपिप्राणा क्षीयन्ते राष्ट्रकर्षणात्।।**[१४]

राज्ञः निर्वाचनविषयेऽपि प्राचीनग्रन्थेषु प्रचुरप्रमाणं प्राप्यते। ऋग्वेदे राज्ञः निर्वाचनं प्रति संकेतः प्राप्यते।[१५] स्मृतिग्रन्थेषु वर्णितमस्ति यत् राज्ञः धर्मानुसारं न प्रचलति तदा तं राज्यसिंहासनतः तत्रत्यः जनाः बहिः कुर्वन्ति।

सर्वे ग्रन्थकाराः स्वीकुर्वन्ति यत् राज्ञः प्रधानकर्तव्यमस्ति प्रजारक्षणम्। महाभारते वर्णितमस्ति यत् सप्तराजशास्त्रप्रणेताः राज्ञः कृते प्रजारक्षणं श्रेष्ठतमं धर्मं मन्यन्ते।[१६] कथनमिदमेव मनुरपि मन्यते स वदति यत् भृत्यसहितं यस्य राज्ञः अवलोकयन् चीत्कुर्वन्ती प्रजा चौरैः लुण्ठ्यते, स नृपः मृततुल्यो भवति। प्रजापालनमेव नृपाणां परमो धर्मोऽस्ति। अस्यः कृते स्वात्मधर्मपालनादेव फलोपभोगः उचितमेवास्ति।

**विक्रोशन्त्यो यस्य राष्ट्रद्ध्रियन्ते दस्युभिः प्रजाः।**
**संपश्यतः सभृत्यस्य मृतः स न तु जीवति।।**
**क्षत्रियस्य परो धर्मः प्रजानामेव पालनम्।**
**निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यतु।।**[१७]

राज्ञः कृते व्यासेन महाभारते लिखितं यत् यथा सर्पः गह्वरावृत्तं मूषकं भक्षति तथैव इयं पृथिवी एतादृशान् शासकान् ब्राह्मणान् च भक्षयति, ये क्रमशः बाह्याक्रमणात् न रक्षन्ति, तथा च विद्या-ज्ञानवर्धनार्थं दूरं न गच्छन्ति।

**भूमिरेतो निगिरति सर्पो बिलशयानिव।**
**राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनम्।।**[१८]

मनोः कथनमस्ति यत् आक्रमणकाले प्रजारक्षणं, युद्धक्षेत्रात् अपलायनम्, युद्धकाले पंचत्व-प्राप्तिः, वीरगतिप्राप्तिर्भवति चेत् तदा ते दुर्लभस्वर्गप्राप्तिः कुर्वन्ति। तथा युद्धोपरान्तं राज्ञा सह ये निमज्जन्ति ते सर्वे पापाद् प्रमुच्यन्ते, तथैव सर्वे सैनिकाः मृत्योपरान्तं पापरहिताः भवन्ति।

**समोत्तमाधमैराजा त्वाहूतः पालयन्प्रजाः।**
**न विवर्तेत संग्रामात् क्षात्र धर्म मनुस्मरन्।।**
**संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम्।**
**शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम्।।**
**आहवेषु मिथोऽन्योऽन्यं जिघांसन्तो महीक्षितः।**
**युध्यमानाः परं शक्तया स्वर्गं यान्त्यपराङ्मुखाः।।**
**न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून्।**
**न कर्णिभिर्नापि दिग्धैर्नाग्निर्ज्वलिततेजनैः।।**[१९]

मनुः वदति यत् गुरुकुलाद् आगतानां ब्राह्मणानां धनधान्येन नृपः पूजयेत्। नृपाणां इयं अक्षयनिधिः कथ्यते अर्थात् कदापि धनाभावः न भवति। तथा यस्य राज्ञः राज्ये श्रोत्रियब्रह्मनिष्ठवेदपाठिनः क्षुधया पीड़िताः भवन्ति तेषां क्षुधया तस्य राज्ञः राज्यमपि अचिरादेव विनश्यते।

**आवृत्तानां गुरुकुलाद्विप्राणां पूजको भवेत्।**
**नृपाणामक्षयोह्येषः निधिब्राह्मोऽभिजायते।।**
**यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा।**
**तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति।।**[२०]

मनुस्मृतौः लिखितमस्ति यत् राज्ञः स्वात्मप्रजायाः सहाय्यं क्रियेत् तथा क्षत्रियवैश्यश्च शास्त्रविहितकर्मानुसारं तस्य सहाय्यं कुर्वन्ताम्, पालितपोषितः शूद्रोऽपि स्वातशिल्पकार्येण राज्ञः सहाय्यं संपादयेत्। वृद्धानां अन्धकानां वैध् ाव्यानां असहाय्यानां च व्यवस्था कृत्वा प्रजापालनं क्रियेत्, उद्योगेन व्यवसायेन हीनक्षत्रियाणां वैश्यानां शूद्राणां च समयानुकूलसहाय्यं राज्ञः परमकर्तव्यमस्ति।[२१]

मनुः राज्ञः कृते वदति यत् प्रातः उत्थाय शौच मुखमार्जनस्नानादिकं कृत्वा, एकाग्रचित्तं भूत्वा अग्निहोत्रब्राह्मणपूजनं कृत्वा तदोपरान्तं सभायां प्रविशेत्। तस्यां सभायां उपस्थितां सर्वां प्रजां स्वात्मवचोभिः प्रसन्नं कृत्वा विसर्जयेत् ततः मन्त्रिभिस्सह राज्यसन्धिविग्रहादिविषयका मन्त्रणां क्रियेत्।

**उत्थाय पश्चिमे यामे कृतशौचः समाहितः।**
**हुताग्निर्ब्राह्मांश्चर्घ्यं प्रविशेत्स शुभांसभाम्।।**
**तत्रस्थितः प्रजाः सर्वाः प्रतिनिन्ध विसर्जयेत्।**
**विसृज्य च प्रजाः सर्वा मन्त्रयेत्सहमन्त्रिभिः।।**[२२]

पर्वतेऽऽरुह्य एकान्तगृहे वा वृक्षरहितकानने वा निर्जनस्थाने यत्र समान्यजनानां प्रवेश वर्जितोऽस्ति तत्र मन्त्रिभिस्सह मन्त्रयेत्।यस्य मन्त्रणां अन्ये जनाः न ज्ञातुं शक्यन्ते स कोशहीनः नृपोऽपि सम्पूर्णं पृथिव्यां शासयति।

**गिरिपृष्ठे समारुह्य प्रासादं वा रहोगतिः।**
**अरण्ये निःश्लोके वा मन्त्रयेदविभाविताः।।**

**यस्य मन्त्रं न जानन्ति समागम्य पृथग्जनाः।**
**स कृत्स्नां पृथिवीं भुक्तंते कोशहीनोपिपार्थिवः।।**[२३]

जड़मूकान्धवधिरपक्षीणश्च वृद्धस्त्रीम्लेक्षरुग्णविकृतांगादिकं च मन्त्रणा समये तत्राद् निर्वायेत्, पूर्वोक्तजड़ादीनां अपमानं प्राप्ताः जनाः मन्त्रभेदं वदन्ति, एवमेव शुकसारिकापक्षिणोऽपि स्त्रियश्च मन्त्रभेदिकाः भवन्ति, अतो मन्त्रणा काले एतेषां सर्वेषां निर्वायेत्।[२४]

मध्याह्ने अर्धरात्रौ चित्तक्लिलेन शरीरक्लेशेन रहितः नृपः मन्त्रिभस्सह एकाकिनो धर्मार्थकाममोक्षादि विषये चिन्तयेत्।चेत् धर्मार्थकाममोक्षादयः मिथः विरुद्धाः भवन्ति तदा एतेषां दोषपरिहारेण उपार्जनं कन्यादानं पुत्ररक्षणं शिक्षणादिकं चिन्तयेत्।[२५]

अन्यराज्ये दूतसंप्रेषणे तथा शेषकार्येष्वन्तःपुरे यत् प्रचारोऽभवत् विषयेऽस्मिन् तथा प्रतिनिधीनां च कार्यविषये चिन्तयेत्। सर्वेषां अष्टविधकार्याणां पंचवर्गाणां परमार्थेन चिन्तनं क्रियेत् तथा अमात्यादीनां अनुरागविरागमपि ज्ञायेत्, मण्डलप्रचारविषयेऽपि चिन्तयेत्।

**दूतसंप्रेषणं चैव कार्यशेषं तथैव च।**
**अन्तःपुरप्रचारं च प्रणिधीनां च चेष्टितम्।।**
**कृत्स्नं चाष्टविधं कर्म पंचवर्गं च तत्त्वतः।**
**अनुरागापरागौ च प्रचारं मण्डलस्य च।।**[२६]

मनुना राजानं विषरक्षणाय नियमानि निगदितानि, सो वदति यत् नृपः तमेव भोजनं खादनीयं यत् सम्यक्परीक्षितं भवेत् तथा यदन्नं विश्वासिभिः पाचयते स्म, यस्मिन् विषशान्त्यर्थं मन्त्रस्य प्रयोगोऽभवत्। नृपः स्वभोज्यवस्तुषु विषमोचकवस्तूनि सम्मेल्यानन्तरमेव भोजयेत्। एतादृशानि रत्नानि धारयेत् ये विषविमोचकाः भवन्ति। तादृशी स्त्रियः राज्ञः स्नानार्थं लेपनार्थं वीजनार्थं स्पर्शार्थं च नियोजयेत् याः भक्तहृदया भवन्ति तथा यासां वस्त्राभूषणानि सम्यक् परीक्षाकर्तुं शक्यते। राजानं स्वात्म वाहनशय्याभोजनस्नानलेपनादिषु विषयेषु विशेष चिन्ता क्रियेत्।[२७]

व्यासोऽपि राज्ञः संरक्षणविषये वदति यत्-

**गुणाधानमशक्यं तु यस्य कर्तुं स्वभावतः।**
**बन्धनं तस्य कर्तव्यं गुप्तदेशे सुखान्वितम्।।**
**अवनीतकुमारं हि कुलमाशु विशीर्यते।**
**अधिकारेषु सर्वेषु विनीतं विनियोजयेत्।।**
**आदौ स्वल्पे ततः पश्चात्क्रमेणाथ महत्स्वपि।।**[२८]

मनुना प्रोक्तं यत् नृपः अपराधिनं दण्डानुसारमेव दण्डयेत्, दण्डोऽयं शास्त्रेण सम्यक्प्रकारेण रक्षितो भवेत्, स दण्डयन्नपि प्रजां प्रसन्नयति, असमीक्ष्यदण्डविधानं सर्वतः विनाशयति। आलस्यरहितः नृपः चेत् अपराधिनं न दण्डयेत् तदा शूलारोहिता मत्स्यवत् बलशालिनः जनाः निर्बलान् मारयन्ति।

**समीक्ष्य स धृतः सम्यक् सर्वा रंजयति प्रजाः।**
**असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः।।**
**यदि न प्रणयेद्राजा दण्डं दण्डयेष्वतन्द्रितः।**
**शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः।।**[२९]

एवं मनुस्मृतौ राज्ञः स्वरूपविषये कर्तव्यविषये बहुशो वर्णनं प्राप्यते।

**(ख) अमात्यः**-राज्यसप्तांगेषु द्वितीयांगः अमात्योऽस्ति, अयं सचिवः, मन्त्री अपि कथितुं शक्यते। अमात्य शब्दः अतिप्राचीनोऽस्ति, ऋग्वेदे शब्दस्यास्य बीजः सर्वप्रथमे प्राप्यते-

**कृणुष्व पाजः प्रसितिं न पृथिवीं याहि राजेवामवां इभेन।**[३०]

**याहि राजा इमेव अमात्यवान् अभ्यमनवान् स्ववान् वा।**[३१]

मनुः वदति यत् कमपि कार्यं एकाकिनं सम्पादनार्थं कठिनं भवति, तदा शासनकार्यं त्वतिकठिनं भवति, यः कल्याणस्य परमलक्ष्यं भवति, विना सहायकैः कथं सम्भाव्यते।अतो मन्त्रिभिस्सह साधारणसन्धिविग्रहं प्रति, स्थानं प्रति, द्रव्यधान्याद्युन्नतिं प्रति तथा सर्वेषां रक्षाविधाने चिन्तयेत्।

**अपि यत्सुकरं कर्मं तदप्येकेन दुष्करम्।**
**विशेषतोऽसहायेन किन्तु राज्यं महोदयम्।।**
**तैः सार्धं चिन्तयेन्नित्यं सामान्यं सन्धिविग्रहम्।**
**स्थानं समुदयं गुप्तिं लब्धप्रशमानानि च।।**[३२]

ते मन्त्रिणः पृथक्-पृथक् तथा सर्वेषां प्राप्ताधिकारान् अभिज्ञाय कार्येषु स्वात्महितं चिन्तयन्तु। तेषं सर्वेषु मन्त्रिषु अतिधर्मात्माभिस्सह बुद्धिमान्ब्राह्मणैःस्सह नृपः षड्गुणयुक्तं मन्त्रणां संपादयेत्। तेषु मन्त्रिषु उच्चविश्वासः कुर्वन् सर्वाणिकार्याणि तेभ्यः समर्प्य यदुचितं तदैवाचरेत्, तैस्सह विनिश्चित्य कार्याणि संपादयेत्, अन्येऽपि पवित्रबुद्धिमान्परीक्षितद्रव्याणां चोपार्जनयुक्तियुक्तान् जनान् मन्त्रिपदे स्थापयेत्।[३३]

मनुस्मृतौ वर्णनमायाति यत् राज्ञः आवश्यकतानुसारं योग्यतानुसारमेव आलस्यरहित-प्रमादरहित- चतुर-बुद्धिमान् जनान्नेव मन्त्रिपदे नियोजयेत्। तेषु शूरचतुरकुलीनमन्त्रिणं धनस्थाने तथा अर्थशुचीन् जनान् रत्नखनने, भीरूनां च राजभवने गमनानगमनार्थं नियोजयेत्।

**निर्वर्त्तेतास्ययावद्भिरिति कर्त्तव्यनानृभिः।**
**तावतोतन्द्रितान्दक्षान् प्रकुर्वीत विचक्षणान्।।**
**तेषामर्थे नियुंजीत शरान्दक्षान् कुलोद्गतान्।**
**शुचींनाकारकर्मान्ते भीरूनन्तनिवेशने।।**[३४]

निर्वाचितसचिवः आत्मनिकषा दूतं स्थापयेत् तथा ते बहुश्रुतः, हृदयभावाकारचेष्टादीनां ज्ञाताः, अन्तःकरणशुद्धाः, चतुराः, कुलीनाश्च भवन्तु। प्रीतियुक्ताः शुद्धचित्तः, चतुराः, स्मृतज्ञाः, देशकालादीनां ज्ञाताः, सुशरीराः, निर्भीकाः, वाक्चतुराः मन्त्रिणः एव श्रेष्ठास्सन्ति।

मनोः कथनमस्ति यत् मन्त्रिणः अधीनो दण्डः, दण्डश्चाधीनः सुशिक्षा भवति।

**अमात्ये दण्ड आयात्तो दण्डे वैनायिकी क्रिया।**[३५]

मनोः कथनमस्ति यत् राज्ञः वंशपरम्परानुसारं शास्त्रेषु प्रवीणः, वीरः, उच्चकुलोत्पन्नः, सम्यक्परीक्षितः सप्ताष्टसंख्यकाः मन्त्रिपदे निर्वाचयेत्।

**सचिवान्सप्त चाष्टौवा प्रकुर्वीत परीक्षितान्।**[३६]

मनुना एतादृशानां विषयाणां तालिका लिखिता अस्ति येषु विषयेषु मन्त्रिभिः मन्त्रणा आवश्यकी वर्तते। यथा- शान्ति, युद्धस्थान, करोद्गम, रक्षा, प्राप्तधनसंरक्षण, तस्य वितरणं च। नृपाणां कृते आवश्यकमस्ति मन्त्रि सम्पत्तिग्रहणम्, पृथक्-पृथक् रूपेण सम्मिलितरूपेण वा सम्पत्तिं नीत्वा यद् लाभप्रदं भवेत् तदेव क्रियेत्। नृपः अन्ते नीतिविषयकषड्साधनविषये कस्मात् भिज्ञब्राह्मणात् परामर्शः विश्वासेन सह आवश्यकमस्ति, तथा नीतिविषयिका सर्वा सहमतिः आचरणीया भवेत्।

**तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक् ।**
**समस्तानां च कार्येषु विदध्याद्धितमात्मनः।।**
**सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता।**
**मन्त्रयेत्परमं मन्त्रं राजा षाड्गुण्यसंयुतम्।।**
**नित्यं तस्मिन्समाश्वस्तः सर्वकार्याणि निक्षिपेत्।**

**तेन सार्धं विनिश्चित्य ततः कर्मसमारभेत्।।**[३७]

एवं मन्त्रिणां विषये अनुकरणीय कार्याणां मनुना सप्रमाणेन स्वात्म मनुस्मृतौ विस्तरेण विवेचितम्।

**(ग) राष्ट्रः**- 'राष्ट्र' ऋग्वेदे सर्वप्रथमं प्राप्यते, तत्र वर्णितमस्ति -मम राष्ट्रः उभयतः वा उभयगोलकेषु अस्ति। **'मम द्विता राष्ट्रं क्षत्रियस्य।'**[३८] वरुणं राष्ट्रस्वामी कथ्यते- **'राजा राष्ट्रणाम्......।'**[३९] तैत्तिरीयसेहितायामपि आशीर्वचनरूपे वर्णितमस्ति- राष्ट्रेऽस्मिन् राजा शूर, महारथी धनुर्धरश्च भवेत्।

**आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामास्मिन् राष्ट्रे राजन्यः इषव्यः शूरो महारथो जायतां दोगध्री धेनुर्वोडानढवानाशुः सपितः पुरन्धिर्योषा जिष्णु रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्।।**[४०]

मनोः वदति यत् राजानं एतादृशेषु देशेषु स्थानेषु वा गृहनिर्माणं क्रियेत् यत्र जलसंग्रहो न भवेत्, यत्र प्रचुरान्नं उत्पद्यते, यत्र श्रेष्ठ आर्याः निवसन्ति, यत्र उपद्रवाः न भवन्ति, यत्र रमणीयता भवेत्, यत्र सामन्ताः आगच्छन्तु, यत्र जीविकासाधानं सारल्येन प्राप्यते।

**अल्पोदकतृणो यस्तु प्रवातः प्रचुरातपः।**
**स ज्ञेयो जांगलो देशो बहुधान्यादिसंयुतः।।**[४१]

मनोः राष्ट्रनिर्माणार्थं कुरुक्षेत्र, मत्स्यदेश, पांचालदेश, शूरसेनक, ब्रह्मर्शिदेश यो ब्रह्मवर्तं निकषा अस्ति एतेषु देशेषूत्पन्नब्राह्मणेभ्यः सर्वत्रोत्पन्नाः जनाः स्वात्मकायेषु शिक्षाप्राप्नुवन्तु इति कथितवान्।

**कुरुक्षेत्रं च मत्स्याश्च पांचालाः शूरसेनकाः।**
**एश ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः।।**
**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्या सर्वमानवाः।।**[४२]

एवं राष्ट्रनिर्माणविषये मनुना स्वल्पेनैव स्वात्ममनुस्मृतौ वर्णितम्।

**(घ) दुर्गः**-मनुना राजधान्याम राष्ट्रपूर्वैव कथितम्,राजधास्यां शत्र्वाधिकारेण गंभीरभयोत्पद्यते, यतोहि तत्रैव सर्वं भोज्यपदार्थं संग्रहो भवति, तत्रैव प्रमुखतत्वानां सैन्यबलानां च आयोजनं भवति। चेत् नृपः राजधानीं रक्षाकर्तुं न शक्यते तदा परहस्तगतराज्यं प्रत्यावर्तते, राज्यरक्षा च भवितुं शक्यते। चेत् राज्यस्य केचित् भागः शत्रुभिः जयते किन्तु राजधानी अविजिता भवेत्। राजधानी एव शासनधुरी अस्ति।

**स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ सुहृत्तथा।**
**सप्तप्रकृतयोर्होताः सप्तांगं राज्यमुच्यते।।**
**सप्तानां प्रकृतीनां तु राज्यस्यासां यथाक्रमम्।**
**पूर्वं पूर्वं गुरुतरं जानीयाद्व्यसनं महत्।।**[४३]

मनुः दुर्गं राष्ट्रानन्तरं स्थानं प्रदत्तवान्। प्राचीनयुद्धपरम्परायाः तथा उत्तरभारतस्य भौगोलिकस्थित्वेन राज्यतत्त्वेषु राजधानीं दुर्गं च अतिमहत्ता प्रदीयते स्म। राजधानी देशसम्पत्तेः दर्पणं आसीत्, चेत् सा उच्चभित्तिभिः सुदृढा भवति तदा सुरक्षाकार्यमपि करोति स्म।मनुः पुनः वदति यत् सर्वेशु दुर्गेशु पर्वतश्रृंखलामध्ये दुर्गं श्रेष्ठमस्ति। अतो सर्वैः प्रयत्नैः अस्य आश्रयं स्वीक्रियेत्, यतोहि अत्र सर्वाधिकंगुणमस्ति।

**सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्।**
**एषां हि बाहुगुण्येन गिरिदुर्गे विशिष्यते।।**[४४]

यथा एतान् दुर्गवासिनं शत्रुः पीडादातुं न शक्यते तथैव दुर्गाश्रयं नृपं शत्रुः हन्तुं न शक्यते। दुर्गस्यान्तरस्थ एकः धनुर्धरः शतैः सह योद्धुं शक्यते तथा दशसम्राधिकैस्सह योद्धुं शक्यते, अतो दुर्गनिर्माणं भवति।

**यथा दुर्गाश्रितानेतान्नोपसंहिंसति शत्रवः।**
**तथारयो न हिंसन्ति नृपं दुर्गं समाश्रितम्।।**

**एकः शतं योधयति प्रकारस्थो धनुर्धरः।**
**शतं दशसहस्राणि तस्माद्दुर्गं विधीयते।।[४५]**

स्वयंभूमनुना एवं निगदितं यत् दुर्गेषु दुर्गः मनुष्यस्य दुर्गोऽस्ति, यतोहि मन्दराचलपर्वतशिखरोऽपि मनुष्यरहितो भवेत् तदपि शत्रवः नतं न त्यजन्ति।

**मंदरस्यापि शिखरें निर्मनुष्यं न शिष्यते।**
**मनुष्यदुर्गं दुर्गाणां मनुः स्वायम्भुवोऽब्रवीत्।।[४६]**

दुर्गोऽयं आयुधशास्त्रादि, धन-धान्य, वाहन, ब्राह्मण, शिल्प, यन्त्रादीनां संरक्षणार्थं उचितो भवति। दुर्गस्यास्य मध्ये स्त्रीगृहं, देवागारं, आयुधस्थानं, मन्दिरं, अग्निशालादि, भित्तिभिः रक्षितं, सर्वधातुफलपुष्पादियुक्तं, शुभ्रंवर्णयुक्तं, जलवृक्षादीनां संयुक्तं स्वात्मगृहं निर्मीयेत्।

**तत्स्यादामुधसम्पन्नं धनधान्येन वाहनैः।**
**ब्राह्मणैः शिल्पिभियन्त्रैर्यवसेनोदकेन च।।**
**तस्य मध्ये सुपर्याप्तं कारयेद्गृहमात्मनः।**
**गुप्तं सर्वतुकं शुभ्रं जलवृक्षसमन्वितम्।।[४७]**

शुक्रनीतौ षड्विधदुर्गानां वर्णनं प्राप्यते, प्रथमः **धान्वदुर्गः** (जलविहीनः, विस्तृताभूमिः पंचयोजनपर्यन्तं), द्वितीयः- **महीदुर्गः** (स्थलदुर्गः प्रस्तरखण्डेषु वा ईष्टिकानिर्मितप्राकारैः युक्तं, यो द्वादशफुटपरिमाणाधिकं विस्तृतं तथा चतुर्गणा उच्च भवेत्), तृतीयः- **जलदुर्गः** (चतुर्दिक्जलावृत्तः), चतुर्थः **वार्क्षदुर्गः** (यं परितः योजनैकपर्यन्तं कण्टकयुक्तं, दीर्घाकारवृक्षं, कण्टकगुल्मादयः भवन्ति), पंचमः **नृदुर्गः** (यो चतुरंगिणीसेनया चतुर्दिक् सुरक्षितो भवेत्), षष्ठः **गिरिदुर्गः** (पर्वतमध्यस्थः दुर्गः, यस्मिन् काठिन्येन आरोहणं भवति तथा यस्मिन् एकाकिनमेव संकीर्णमार्गो भवति)।[४८] मनुरपि एवं निगदति-

**जांगलं सस्यसंपन्नमार्यप्रायमनाबिलम्।**
**रम्यमानतसामन्तं स्वजीव्यं देशमावसेत्।।**
**धनुदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा।**
**गिरिदुर्गं नृदुर्गं वा समाश्रित्य वसेत्पुरम्।।[४९]**

एवं मनुना कथितं यत् राज्ञः राजधानी दुर्गमध्ये सर्वथा स्वतन्त्ररूपेण निर्मातुं शक्यते। तेषामपि गिरिदुर्गं सर्वश्रेयस्करं भवति-

**सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्।[५०]**

एवं मनुना स्वात्ममनुस्मृतौ दुर्गविषये बहुधा व्याकृतम्।

**(ङ) कोशः**-राजकोशविषये प्राचीनग्रन्थेशु लेखकैः अनेकषः वर्णनं कृतम्। कौटिल्यार्थशास्त्रे लिखितमस्ति यत् यस्य राज्ञः राजकोशः रिक्तो भवति स नगरवासिनं ग्रामवासिनं च चूसति। राज्यस्य सर्वाणि कार्याणि व्यापाराश्च कोशैवाश्रितास्सन्ति, अतो राजानं सर्वप्रथमं कोशविस्तारविषये चिन्ता भवति।

**कोशमलाः कोशपूर्वाः सर्वारम्भाः। तस्मात्पूर्वं कोशमवेक्षेत।[५१]**
**कोशश्च सततं रक्ष्यो यत्नमास्थाय राजभिः।**
**कोशमूला हि राजानः कोशो वृद्धिकरो भवेत्।।[५२]**
**कोशमूलो हि राजेति प्रवादः सर्वालौकिकः।[५३]**

राजकीयकोशवृद्धिविषये मनुना अनेकेषु स्थलेषु अनेकेषां सिद्धान्तानां उल्लेखः कृतः। स वदति यत् क्रयविक्रयं, मार्गव्ययं, रक्षाकार्यंव्ययविषये कोशवृद्धिः निश्चयेन आवश्यका भवति।

**क्रयविक्रयमध्वानं भक्तं च सपरिव्ययम्।**

**योगक्षेमं च संप्रेक्ष्य वाणिजो दापयेत्करान्।।**
**यथा फलेन युज्येत राजा कर्त्ता च कर्मणाम्।**
**तथा वेक्ष्य नृपो राष्ट्रे कल्पयेत्सततं करान्।।**[५४]

मनुः पुनः वदति यत् यथा जलोका, गोशिशुः, भ्रमरः शनैः शनैः स्वात्मभोजनं प्राप्नुवन्ति तथैव नृपोऽपि स्वल्पं-स्वल्पं कृत्वा राष्ट्रतः वार्शिककरं ग्राह्येत्। पशुसुवर्णादिलाभस्य पंचमभागः, धान्यादिकस्य चाष्टम, षष्ठ, द्वादशभागः (उत्पादनं श्रमं वा वीक्ष्य) राजा कररूपे ग्राह्येत्। वृक्षमांसमधुघृतगन्धौषधिरसपुष्पमूलफल- पत्रशाकतृणचमर्सदिकस्य तथा मृद्पाषाणनिर्मितवस्तूनां षड्भागं कररूपे ग्राह्येत्।

**यथाल्पाल्पमदन्त्याद्यं वार्यो गोवत्सषट्पदाः।**
**तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः।।**
**पंचाशद्भागं आदेयो राज्ञा पशुहिरण्ययोः।**
**धान्यानामष्टमो भागः षष्ठो द्वादश एव वा।।**
**आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम्।**
**गन्धौषधिरसानां च पुष्पमूलफलस्य च।।**
**पत्रशाकतृणानां च चर्मणां वैदलस्य च।**
**मृण्मयानां च भाण्डानां सर्वस्याश्ममयस्य च।।**[५५]

महाभारते उद्योगपर्वणि अपि इदं कथनं तदवदेव प्राप्यते-

**यथा मधुसमादत्ते रक्षन् पुष्पाणि षट्पदः।**
**तद्वदर्थान्मनुष्येभ्यः आदद्यादविहिंसया।।**
**पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत्।**
**मालाकार इवारामे न यथांगारकारकः।।**[५६]

मनुना प्रोक्तं यत् म्रियमाणः नृपोऽपि श्रोत्रियात् करं न ग्राह्येत् तथा अस्य राज्ये निवसन् श्रोत्रियः क्षुध ाापिपासायाश्च पीडितो न भवेत्। यस्मिन् राज्ये श्रोत्रियः वेदपाठी क्षुधापीडितो भवति तस्मात् क्षुधया राज्ञः राज्यमपि अचिरादेव विनश्यते।

**म्रियमाणोप्याददीत न राजा श्रोत्रियात्करम्।**
**न च क्षुधाऽस्य संसीदेच्छ्रोत्रियो विषयेवसन्।।**
**यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा।**
**तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति।।**[५७]

मनुः श्रोत्रियस्य कराधानविषये वदति यत् यो वेदपाठयज्ञदानपूजादीनि कार्याणि करोति, तस्य षड्भागः समुचितरक्षणेन राजा प्राप्नोति। प्राणिनां धर्मपूर्वकं रक्षयन् तथा वाध्यानां दण्डयन् नृपः मन्ये प्रतिदिनं लक्षदक्षिणायुक्तं यज्ञादिकं सम्पादयति।

**यदधीते यद्यजते यद्दाति यदर्चयति।**
**तस्य षड्भागभाग्राजा सम्यग्भवति रक्षणात्।।**
**रक्षन्धर्मेण भूतानि राजा वध्यांश्च घातयान्।**
**यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः।।**[५८]

मनुः राजकीयकोशवृध्यर्थं कथितवान् यत् पुराणं क्षितौ निहितं धनं चेत् कोऽपि प्राप्यते तदा तद्धनादर्धं ब्राह्मणाय प्रदीयेत् तदर्धं च नृपः कोशे नियोजयेत्।

**यं तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ।**

**तस्माद् द्विजेभ्यो दत्त्वार्धमर्धं कोशे प्रवेशयेत्।।**[५९]

पुराणनिधिः (ब्राह्मेभ्यः भिन्नप्राप्ता) तथा सुवर्णाद्युत्पत्तिस्थनानां प्राप्तधनस्य नृपोऽर्ध भागस्य अधिकारी भवति। यतोहि भूमिरक्षाणेन स तस्य स्वामी वर्तते। यद्धनं चौरेभ्यः प्राप्यते तद्धनमपि राजा कोशे नियोजयेत् वा तद्धनस्य स्वामिनं समर्पयेत्।

**निधीनां तु पूराणानां धातूनां च क्षितौ।**
**अर्धभग्रक्षणाद्राजा भूमेरधिपतिर्हि सः।।**
**दातव्यं सर्ववर्णेभ्यो चौरैर्हृतं धानम्।**
**राजातदुपयुज्यानश्चोरस्याप्नोति किल्विषम्।।**[६०]

एवं कोशवृद्धिविषये मनुना मनुस्मृतौ विस्तरेण स्वात्मविचारान् निवेदितः।

**(च) दण्डः (सेना)-** दण्डविषये प्राचीनग्रन्थेषु सेना शब्दोऽपि प्राप्यते। परन्तु अनेके विद्वान्सः दण्डस्य तात्पर्यं **'शरीरिकदण्डं अर्थदण्डं वा मन्यन्ते'** तथा ते चतुरंगिणीसेनायाः गणना कोशान्तर्गते मन्यन्ते।

**दण्डः चतुरंगसैन्यं न भवति। अपराधानुसारेण शारीरोऽर्थदण्डः परिकल्पनीयः।**

परन्तु ऋग्वेदे वर्णनमस्ति यत् दण्डः शब्दः सेनाऽस्त्रशस्त्रयुद्धादिविषये प्रयुज्यते। 'सेनानी' शब्दः ऋग्वेदे प्रयुज्यते यत्र युद्धाक्रोशं संनानिनः कृते उच्चार्यते।

**अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि।**[६१]

अत्र धनुषबाणकवचप्रत्यंचातुणीरसारथी-अस्त्रशास्त्रादीनां विषये प्रयोगोऽभवत्।[६२]

सेना चतुर्विधा भवति स्म यस्यां हस्ती, अश्व, रथ, पदातयश्च भवन्ति स्म, एवं विधां सेनां चतुरंगिणी नाम्ना अभिधीयते स्म।[६३]

मनुः वदति यत् प्रजापालयन् नृपः समोत्तमहीनशत्रोः आह्वाने क्षत्रियधर्मं अनुसरन् युद्धात् न पलायते। संग्रामतः अपलायनं प्रजारक्षण-पालनं, ब्राह्मणानां च सेवा राज्ञः परमकल्याणकारिणः कर्माणि सन्ति।

**समोत्तमाधमैराजा त्वाहूतः पालयन्प्रजाः।**
**न निवर्तेत संग्रामात् क्षात्रधर्ममनुस्मरन्।।**
**संग्रामेश्वनिवर्तित्वं प्रजानां चैव पालनम्।**
**शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम्।।**[६४]

संग्रामेषु एकस्य मारणेच्छा कुर्वन् नृपाः परमशक्त्या युद्धं कुर्वन्, अपराङ्मुखाः स्वर्गं प्राप्नुवन्ति। युद्धमाना रणे शत्रून् न कूटायुधैः संहरेत् तथा न कर्णीबाणैः, न विषाग्निदग्धैः बाणैः, न च ज्वलितबाणैश्च हन्येत्।

**आहवेशु मिथोऽन्योन्यं जिघांसतो महीक्षितः।**
**युध्यमानाः परं शक्तया स्वर्गं यान्त्यपराङ्मुखाः।।**
**न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून्।**
**न कर्णिभिर्नापि दिग्धैर्नाग्निर्ज्वलिततेजनैः।।**[६५]

मनुः पुनः वदति यत् भूमस्थं सैनिकं न हन्येत्, न तु नपुंसकं, कृतांजलिमपि न हन्येत्, न मुक्तकेशं, नासीनं, तवास्मि वादिनमपि न हन्येत्, न सुप्तं, न निर्कवचं, न नग्नं, न निरायुधं, न अयुध्यमानं, न पश्यन्तं, न च परेण समागतम् हन्येत्। नायुधव्यसनप्राप्तं, न आर्तं , नातिपरीक्षितं, न भीतं, न परावृत्तं, न साधुं, न धर्मानुमस्मरन् हन्येत्। एतादृशान् जनान् योहन्यते स पापभागिनोभवति।[६६]

मनुः वदति यत् यदानृपः शत्रु राज्ये युद्धं करोति तदा अनया विधिना शनैः शनैः राज्ये गमनं क्रियेत् यादृशी सैन्यबलं भवेत् तदनुसारमेव शुभे मासे यात्रा संपादयेत्। अन्येषु कालेष्वपि यदानिश्चयो भवेत् तदा यात्रा संपादयेत् तथा सैन्यबलेनसहैव युद्धं आरम्भेत्। स्वात्मराज्यस्य दुर्गस्य च रक्षा संपाद्य डेरातम्बूदयः नीत्वा दूतान् च सम्यक् नियोजयेत्।[६७]

ततः मार्गसंशोधनं कुर्यात्-

**संशोध्य त्रिविधं मार्ग षड्विधं च बलं स्वकम्।**
**सांपरायिक कल्पेन यायादरिपुरं शनैः।**
**शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत्।**
**गतप्रत्यागते चैव स हिकष्टतरो रिपुः।।**[६८]

दण्डव्यूहेन मार्गप्रयात्तु वा शकटवराहमकरसूचीगरुडतृल्याकृतियुक्ताः व्यूहेन यदनुकूलः तस्मिन्नेव मार्गे गमनं भवेत्।

**दण्डव्यूहेन तन्मार्ग यायात्तु शकटेनवा।**
**वराहमकराभ्यां वा सूच्या वा गरुडेनवा।।**
**यतश्च भयमाशंकेत्ततो विस्तारयेद् बलम्।**
**पद्मेन चैव व्यूहेन निविशेत सदा स्वयम्।।**[६९]

सेनापति-सेनानायकादिकं सर्वासु दिशासु नियुज्य यस्यां दिशायां भयः ज्ञायते तां दिशां प्रथमा पूर्वदिशा कल्पयेत्, सेनास्तम्भवत् दृढाप्तपुरुषान् विभिन्ना संज्ञा संकेत्य परितः स्थापयेत्, ये स्थानाः युधि प्रवीणः निर्भयाश्च भवन्ति तत्र सौगम्येन निवासकार्यं क्रियते।

**सेनापतिबलाध्यक्षौसर्वदिक्षुनिवेशयेत्।**
**यतश्च भयमाशंकेत् प्राचीं तां कल्पयेद्दिशम्।।**
**गुल्मांश्च स्थापयेदाप्तान् कृत संज्ञान्समन्ततः।**
**स्थाने युद्धे च कुशलानभीरुनविकारिणः।।**[७०]

चेदल्पयोद्धा भवेत् तदा तं संगृहीत्य युध्येत् तथा अन्येषां विस्तार्यं युध्येत्, पूर्वोक्तसूच्याकारः वज्राकारव्यूहेन रचना विधाय युध्येत्। समतल भूमौ रथाश्वैश्च युध्येत्, जलस्थाने हस्ती-नौकादिभिः, वृक्षलतावृत्ताभूमौ धनुषैः, कण्टकादिरहितभूमौ खंगचर्माद्यायुधैः युध्येत्।[७१]

शत्रूनावृत्य उच्छिनेत्, निरन्तरं तृणान्नजलेन्धनादिकं विनश्येत्। सरोवरनगरशृंखलामपिभिन्द्येत्, शत्रून् निर्बलं क्रियेत्, रात्रौ त्रासयेच्च।

**उपरुध्यारिमासीत् राष्ट्रं चास्योपपींडयेत्।**
**दूषयेच्चास्य सततं यवसान्नोदकेन्धनम्।।**
**भिन्द्याच्चैव तडागानि प्राकारपरिखास्तथा।**
**समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा ।।**[७२]

एवंमनुस्मृतौ दण्डविषये मनुना अनेकश व्याख्या कृता।

**(छ) मित्रम्-**मनुना मित्रनिर्माणविषये अनेकशः कथितः तथा राज्ञः कृते सद्मित्रस्य गुणानां वर्णनमपि कृतम्- 'राजा सुवर्णभूमि' प्राप्य समृद्धशाली न भवति परन्तु सद्मित्रं प्राप्य अतिसमृद्धशाली भवति, यतोहि भविष्यकाले स शक्तिसम्पन्नो भविष्यति। एकः दुर्बलमित्रोऽपि श्लाघनीयो भवति चेत् स गुणवान् भवेत्, तस्य प्रजा सन्तुष्टा भवति तथा स दृढप्रतिज्ञो भवति।

**हिरण्यभूमिसम्प्राप्त्या पार्थिवो न तथैधते।**
**यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायति क्षमम्।।**[७३]
**मित्रं भूमिं हिरण्यं वा सम्पश्यस्त्रिविधं फलम्।**[७४]

कौटिल्येन कथितं यत् भूमिलाभः हिरण्यलाभः मित्रलाभात् श्रेयस्करोऽस्ति तथा हिरण्यलाभः मित्रलाभात् श्रेयस्करोऽस्ति।

**संहितप्रयाण मित्रहिरण्यभूमिलाभनामुत्तरोत्तरा लाभः श्रेयान्।**[७५]

मित्राणां त्रिविधभेदाः शस्त्रकारैः निगदिताः-सहज, कृत्रिम, प्राकृतश्च। सहजमित्राणि ते सन्ति ये पितरौ सम्बन्धात् प्राप्यन्ते। कृत्रिमित्राणि ते भवन्ति ये प्राप्यन्ते अर्थात् य विजिगीषुं आत्मसहाय्येन अनुग्रहणन्ति। तथा प्रकृतमित्राणि ते सन्ति ये प्रतिवेसिनः राजसीमायां निकषा स्थितास्सन्ति, अनेनैव तान् प्राकृतसांया अभिधीयते।[७६]

मनुः वदति यत् परराज्ये दूत संप्रेषणे अन्तःपुरकार्येषु च यत् प्रचारोऽभवत् तथाप्रतिनिकार्येषु चिन्तयेत्।

**दूतसंप्रेषणं चैव कार्यशेषं तथैव च।**

**अन्तःपुरप्रचारं च प्रणिधीनां च चेष्टितम्।।**[७७]

ग्रन्थेषु चतुर्विधमित्राणां वर्णनं प्राप्यते, विजिगीषु, अरि, मध्यम, उदासीनाश्च एतानि मित्राणि स्वतन्त्रश्रेण्याः द्योतकास्सन्ति, तथाऽन्ये मित्र, मित्रमित्र, आक्रन्द, आक्रान्दासारनाम्ना मन्यन्ते, केचिच्च अरिमित्र, अरिमित्रमित्र, पार्ष्णिग्राह, पार्ष्णिग्राहासाराश्च मन्यन्ते।

**पार्ष्णिग्राहाक्रन्दासारदयस्त्वरिमित्रोदासीनेष्वेवान्तर्भजन्ति संज्ञाभेदमात्रं ग्रन्थान्तरे दर्शितमिति योगीश्वरेण न पृथगुक्ताः।**[७८]

मनुना मण्डलसिद्धान्तस्य मूले चतस्नः प्रकृतयः निगदिताः, तास्सन्ति-विजिगीषु, शत्रु, मध्यम, उदासीनाश्च।

**मध्यमस्य प्रचारं च विजिगीशोश्च चेष्टितम्।**

**उदासीनप्रचारं च शत्रोश्चैव प्रयत्नतः।।**

**एताः प्रकृतयो मूलं मण्डलस्य समासतः।**

**अष्टौ चान्याः समाख्याता द्वादशैव तु ताः स्मृताः ।।**[७९]

मनुना प्रोक्तं यत् नृपः स्वसाधनानि एवं व्यवस्थयेत् अनेन तस्य मित्राणि, उदासीनाः, शत्रवश्च तस्य हानिः कर्तुं न शक्यन्ते वा तस्माद् उच्चस्थानं न लप्स्यन्ते। स्वार्थागते सति मित्राण्यपि शत्रवः भवितुं शक्यन्ते।

**सर्वोपायैस्तथा कुर्यान्नीतिज्ञः पृथिवीपतिः ।**

**यथास्याभ्यधिका नस्युर्मित्रोदासीनशत्रवः ।।**

**आयतिं सर्वकार्याणां तदात्वं विचारयेत्।**

**अतीतानां च सर्वेषां गणदोषैः च तत्त्वतः।।**

**आयत्या गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः।**

**अतीते कार्यशेषज्ञः शत्रुभिर्नाभिभूयते।।**

**यथैनं नाभिसंदध्युर्मित्रोदासीन शत्रवः ।।**[८०]

अर्थशास्त्रे चाणक्यमहोदयेनापि एवमेव निगदितम्-

**विजिगीषुः शक्त्यपेक्षः षाड्गुण्यमुपयुंजीत ।**[८१]

**षाड्गुणस्य प्रकृतिमण्डलं योनिः।**

**सन्धिविग्रहासनयानसंश्रयद्वैधीभावाः शाड्गुण्यमित्याचार्याः ।।**[८२]

मनुः मित्राणां गुणविषये लिखति यत् यानि मित्राणि आसनयानसन्धिविग्रहद्वैधाश्रयादीनां गुणानां अवसरं विलोक्य उचितसम्पादकास्सन्ति। सन्धिः द्विविधा सम्पादने कृते सति विग्रहोऽपि द्विविधा सम्पादयन्ति। द्विविधयानासनसंश्रयादिकं उचितरूपेण प्रयुज्यते तान्येव मित्राणि श्रेष्ठास्सन्ति।

**आसनं चैव यानं च सन्धिं विग्रहमेव च।**

**कार्यं वीक्ष्य प्रयुंजीत द्वैधं संश्रयमेव च।।**

**सन्धिं तु द्विविधं विद्याद्राजाविग्रहमेव च।**

**उभे यानासने चैव द्विविधः संश्रयः स्मृतः।।**[८३]

एवं मनुस्मृतौ वर्णित शासन-व्यवस्थायाः सर्वांगीणस्वरूपं दृग्गोचारी भवति। नृपः वैदिकविधिना एव स्वात्मकार्याणि संचालयन्ति स्म। प्रजा स्व-स्वनिर्धारितेषु कार्येषु तथैव संलग्ना आसीत् यथा- बकः मत्स्यग्राहे ध्यानमवधार्य एकाग्रमनसा तिष्ठति। अमात्यः स्वकीयकार्याणि विधिना संपादयन्ति स्म। कुत्रापि कुमार्गगामिनः न निवसन्ति स्म। शासन-व्यवस्थायां न्यायस्य यत् स्वरूपं मनुस्मृतिकाले दृग्गोचरी भवति तत् आधुनिके काले कुत्रापि दृग्पथं न आयाति। वर्तमानकाले सर्वे जनाः पीडिताः सन्ति, न्यायस्य या दुर्दशा दृष्टिपथं आयाति सा दयनीया इव प्रतिभाति। कोष रक्षकाः काले तस्मिन् उचित कोशस्य व्यवस्था कुर्वन्ति स्म। परन्तु आधुनिके काले कोशस्य रक्षकाः एव भक्षकाः इव प्रतीयन्ते। मित्राणां भेदोपभेदं तेषां स्वरूपः कार्याणां च विशदवर्णनं प्राप्यते। परन्तु आधुनिके काले मित्राण्येव जीवनहारकाः सन्ति। वर्तमानकाले या दुर्दशा समाजस्य अस्ति, सा मनुस्मृतिकाले कुत्रापि न दृग्गोचरी भवति। मनुस्मृतौ वर्णिता शासन-व्यवस्थायाः यत् स्वरूपं दृष्टिपथमायाति तत् वर्तमानकाले कुत्रापि नावलोक्यते। शासकाः एव आत्मनः कलहायमानाः मिथः अन्यन्यों भक्षयितुमिच्छन्ति, अन्योन्यं ताडयन्ति, संशदि अपि मन्त्रिणः मिथः मल्लयुद्धवत् सम्भाषणं कुर्वन्ति। परन्तु मनुस्मृतिकाले या शासन-व्यवस्था आसीत् सा चतुवर्णानुकूलमेव आसीत्। अतः कथयितुं शक्यते यत् तत्कालीन शासन-व्यवस्था न्यायानुकूला, सर्वैरनुग्राह्या, प्रजानुरंजिका च आसीत्।

## Endnotes

[१] मनुस्मृतिः ६/२६५-२६७
[२] महाभारते शान्तपर्वणि ५६/१२५
[३] तदेव ५६/१२६
[४] मनुस्मृतिः ७/३-४
[५] मनुस्मतिः ७/२०
[६] तदेव ७/२५
[७] तदेव ७/१८
[८] मनुस्मृतिः ७/१३
[९] मनुस्मृतिः ७/४-५
[१०] तदेव ७/७-८
[११] तदेव ६/३०३-३११
[१२] नारदस्मृतिः श्लोकाः २०, २२, २६, ५२
[१३] मनुस्मृतिः ७/६-१७
[१४] तदेव ७/१११-११२
[१५] ऋग्वेदे १०/१७३, अथर्ववेद ६/८७, ३/४/२
[१६] महाभारते शान्तिपर्वणि ६८/१-४
[१७] मनुस्मृतौ ७/१४३-१४४
[१८] महाभारते शान्तिपर्वणि ३२/१५
[१९] मनुस्मृतौ ७/८७-९०
[२०] मनुस्मृतौ ७/८२, १३४
[२१] मनुस्मृतौ ५/९४-९५
[२२] मनुस्मृतौ ७/१४५-१३६
[२३] मनुस्मृतौ ७/१४७-१४८
[२४] मनुस्मृतौ ७/१४९-१५०

[२५] मनुस्मृतौ ७/१५१-१५२

[२६] मनुस्मृतौ ७/१५३-१५४

[२७] मनुस्मृतौ ७/२१७-२२०

[२८] मत्स्यपुराणे २२०/५-७

[२९] मनुस्मृतौ ७/१६-२०

[३०] ऋग्वेदे ४/४/१

[३१] निरुक्ते ६/१२

[३२] मनुस्मृतौ ७/५५-५६

[३३] मनुस्मृतौ ७/५७-५६

[३४] मनुस्मृतौ ७/६१-६२

[३५] मनुस्मृतौ ७/६५

[३६] मनुस्मृतौ ७/५७

[३७] मनुस्मृतौ ७/५७-५६

[३८] ऋग्वेदे ४/४२/१

[३९] तदेव ७/३४/११

[४०] तैत्तिरीय संहिता ७/५/१८

[४१] मनुस्मृतौ ७/६६

[४२] मनुस्मृतौ २/१६-२०

[४३] मनुस्मृतौ ६/२६४-२६५

[४४] मनुस्मृतौ ७/७१

[४५] मनुस्मृतौ ७/७३-७४

[४६] मनुस्मृतौ ७/७४ (टिप्पणी भागे)

[४७] मनुस्मृतौ ७/७५-७६

[४८] शुक्रनीतिः ४/६

[४९] मनुस्मृतौ ७/६६-७०

[५०] मनुस्मृतौ ७/७१

[५१] कौटिल्य अर्थशास्त्रे २/१, २/८

[५२] तदेव २/२

[५३] कामन्दक १३/३३

[५४] मनुस्मृतौ ७/१२६-१२७

[५५] मनुस्मृतौ ७/१२६-१३२

[५६] महाभारतेउद्योगपर्वणि ३४/१७-१८

[५७] मनुस्मृतौ ७/१३३/१३४

[५८] मनुस्मृतौ ८/३०५-३०६

[५९] मनुस्मृतौ ८/३८

[६०] मनुस्मृतौ ८/३६-४०

[६१] ऋग्वेदे १०/८४/२

[६२] तदेव ६/७५ सूक्त

[६३] अर्थशास्त्रे ७/११

[६४] मनुस्मृतौ ७/८७-८८

[६५] मनुस्मृतौ ७/८६-६०

[६६] मनुस्मृतौ ७/६१-६४

[६७] मनुस्मृतौ ७/१८३-१८४

[६८] मनुस्मृतौ ७/१८५-१८६

[६६] मनुस्मृतौ ७/१८७-१८८

[७०] मनुस्मृतौ ७/१८६-१६०

[७१] मनुस्मृतौ ७/१६१-१६२

[७२] मनुस्मृतौ ७/१६५-१६६

[७३] मनुस्मृतौ ७/२०८

[७४] मनुस्मृतौ ७/२०६

[७५] कौटिल्यः ७/६

[७६] याज्ञवल्क्य स्मृतिः १/३४५

[७७] मनुस्मृतौ ७/१५४

[७८] याज्ञवल्क्यस्मृतिः १/३४५

[७६] मनुस्मृतौ ७/१५५-१५६

[८०] मनुस्मृतौ ७/१७७-१८०

[८१] कौटिल्यः ७/३

[८२] कौटिल्यः ७/१

[८३] मनुस्मृतौ ७/१६१-१६२

## संदर्भ ग्रंथ

१ **अथर्ववेद :** अपौरूषेय, स्वाध्यायमण्डल, पारडी, सं. तृतीय(१-५)१६५०, सं. प्रथम(६-१०) १६२६, सं. तृतीय (११-१८) १६५०, सं. प्रथम (१६-१०) १६६०

२ **ऋग्वेद**(भाषा भाष्य सहित) : दो भाग, दयानन्द संस्थान, दिल्ली, सं०-२०३१

३ **कामन्दकीय नीतिकार** : टी० गणपति शास्त्री, त्रिवेन्द्रम १६१२

४ **कौटिलीय अर्थशास्त्र** : पं० वाचस्पति गैरोला, चौखम्बा संस्कृत सीरीज, वाराणसी, १६८४

५ **तैत्तिरीय संहिता** : संपादक-सावतलेकर, स्वाध्याय मण्डल, पारडी, बलसार, १६५७

६ **निरुक्तम्** : यास्क, चौखम्बा विद्याभवन, वाराणसी, सन्- २०११

७ **मनुस्मृति** : (सरल भाषा टीका सहित), चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १६८७ ई०

८ **मत्स्यपुराण** : महर्षि वेदव्यास, गुरूमण्डलग्रन्थमाला, ५,क्लाइव रो, कलकता-१ सं. प्रथम, १६५४

६ **महाभारत** : महर्षि वेदव्यास, गीताप्रेस, गोरखपुर। सं. प्रथम १६१२

१० **याज्ञवल्क्यस्मृति** : (मिताक्षरा सहित), हिन्दी व्याख्या - डॉ० उमेशचन्द्र पाण्डेय, चौखम्बा संस्कृत सीरीज,वाराणसी, १६७२

११ **शुक्रनीति :** व्याख्या व सम्पादन पुरी, डॉ उमेश 'ज्ञानेश्वर', रणधीर प्रकाशन, हरिद्वार, १६६६